## बहुलमाभीक्ष्ण्ये । (८१/२९९१)

आभीक्ष्ण्ये गम्यमाने[1] धातोः बहुलं [2]णिनिः प्रत्ययो भवति । आभीक्ष्ण्यं पौनःपुन्यम् । [3]तात्पर्यम आसेवैव, ताच्छील्यादन्यत् । कषायपायिणो गान्धाराः । क्षीरपायिणः [4]उशीनराः । सौवीरपायिणो बाह्लीकाः । बहुलग्रहणात् [5]कुल्माषखादः इत्यत्र न भवति ॥

## मनः । (८२/२९९२)

सुपि इति वर्तते । मन्यतेः[6] सुबन्ते उपपदे णिनिः प्रत्ययो भवति । दर्शनीयमानी । शोभनमानी । बहुलग्रहणानुवृत्तेः मन्यतेः ग्रहणं, न मनुतेः । उत्तरसूत्रे हि[7] खश्प्रत्यये [8]विकरणकृतो विशेषः [9]स्यात् ॥

## आत्ममाने खश् च । (८३/२९९३)

आत्मनो [10]मननमात्ममानः । आत्ममाने वर्तमानान् मन्यतेः[11] [12]सुप्युपपदे खश्प्रत्ययो भवति । चकाराण् णिनिः च । यदा प्रत्ययार्थः कर्ता आत्मानमेव [13]दर्शनीयत्वादिना धर्मेण युक्तं मन्यते, तदाऽयं विधिः । दर्शनीयम् [14]आत्मानं मन्यते दर्शनीयंमन्यः, दर्शनीयमानी । पण्डितंमन्यः[15], पण्डितमानी । आत्ममाने इति किम् ? दर्शनीयमानी [16]देवदत्तस्य यज्ञदत्तः[17] ॥

## भूते । (८४/२९९५)

भूते [18]इत्यधिकारो 'वर्तमाने लट्' (३.२.१२३/२१५१) इति यावत् । यदित ऊर्ध्वमनुक्रमिष्यामः[19] भूते इत्येवं तद् वेदितव्यम् । धात्वधिकाराच्च धात्वर्थे भूते इति विज्ञायते । वक्ष्यति – 'करणे यजः' (३.२.८५/२९९६)[20], अग्निष्टोमेन इष्टवान् अग्निष्टोमयाजी । भूते इति किम् ? अग्निष्टोमेन [21]यजते ॥

## करणे यजः । (८५/२९९६)

णिनिः[22] अनुवर्तते, [23]न खश् । [24]यजतेर्धातोः करणे उपपदे णिनिप्रत्ययो भवति [25]भूते । अग्निष्टोमयाजी[26] । अग्निष्टोमः फलभावनायां करणं भवति ॥

---

1. सुबन्ते उपपदे इत्यधिकम् क. फ. ह. 2. णिनिः नास्ति फ. 3. आसेवा तात्पर्यम् फ. ह, तात्पर्यमेव वा ब. क. 4. उशीनराः नास्ति ह. 5. कुल्माषखादाः क, कुन्मासखादाः ह. 6. धातोः इत्यधिकम् क. ड. फ. ह. 7. एवं इत्यधिकम् ग. अ, प्रत्यये नास्ति फ. 8. विकरणकृतौ ह. 9. स्यात् नास्ति फ. 10. मानं ह, मननं मानः । भावे घञ् क. 11. धातोः इत्यधिकम् ह. 12. सुबन्त उपपदे अ. फ. 13. दर्शनीयादिना गुणेन क. ड. 14. आत्मानं नास्ति फ. 15. दिवादिभ्यः श्यन् इत्यधिकम् ड. 16. देवदत्तः यज्ञदत्तस्य क. ड. ह. 17. अतः सार्वकालिका विधयो वेदितव्याः इत्यधिकम् ड. इ. ग. 18. इत्ययमधिकारो वेदितव्यः ह. 19. वर्तमाने लट् इति यावत् इत्यधिकम् क. 20. इति इत्यधिकम् ह. 21. यजति ब. 22. इति इत्यधिकम् अ. क. फ. 23. न वर्तते च खश् ब. 24. यजेः ब. 25. भूतेऽर्थे वर्तमानात् फ. 26. वाजपेययाजी इत्यधिकम् अ.ब.क.ड.फ.ह.